This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Chandrika 2022

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M1251 विषय पुस्तिका

नाव गणेशचतुर्थीप्रभृतिनानाव्रतविधानम्

लेखक / लिपीकार ← M85

पृष्ठ 03 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशायनमः ॥

काण्वभाष्ये ग्रंथान्तरे :—

मृताग्निः कतिचित्कालं कर्मातीतो भवेदयदि। अष्टौ गावोऽथ गोयुग्मं दत्वा भार्यां समुद्वहेत्॥१॥ निरग्निर्वा वयातीतः कथंचिन्नोद्वहेद्यदि। भार्यां स्वर्णमयीं कृत्वा कौशीं वाधानमाचरेत् ॥२॥

त्रिकांडे मंडनः :- पक्षद्वयमाह :—

एकाकीवादधीताग्नीन् विवाहश्चेन्न सिध्यति। नित्येष्याग्रयणात्यग्नि-होत्रं कर्मास्य नेतरत्॥ अन्येपि अपत्नीकस्य आधानमाहुः तदाशयेन विद्वः॥

धर्मसिंधौ सामान्यविशेषः इत्यस्मिन् ग्रंथे। आहिताग्नेर्दंपत्योः पूर्वं पतिमरणे पत्युः सर्वाग्निभिर्दाहः कार्यः। पश्चान्मृतभार्यायास्तु निर्मंथ्याग्निना कपालाग्निनावा। पूर्वं भार्यामरणे तु तस्या अपि सर्वाग्निभिर्दाहः कार्यः। सर्वपात्राणि तस्यै देयानि। पश्चान्मृतस्य तु पत्युः पुनराधानेन। त्रेताग्निसत्वे तेन दाहः। आधानाकरणे निर्मंथ्येन। लौकिकाग्निनावा। पुनर्विवाहात्पूर्वं सर्वाग्निदाने पश्चाद्विवाहसंभवे सिंधुमते आधानाभावात् निर्मंथ्याग्निरेव शरणम्॥ केषांचिन्मते पुनराधानं। अपत्नीकाधान निर्णयः॥ मैत्रायणीयश्रुतिः आहः- यस्तु स्त्रैरग्निभिः पत्नीं संस्करोति कथंचन। असौ मृतः स्त्री भवति स्त्रीचास्य पुरुषो भवेत्॥ छंदोग परिशिष्टे आश्वाकपिः :— योदहेदग्निहोत्रेण स्वेन भार्यां कथंचन। सस्त्री संपद्यते तेन स्त्री चैवास्य पुमान्भवेत्॥ इति॥ संप्राप्तत्रेताग्नि-संस्कारायाः पत्न्याः पुंस्त्वरूप उत्कर्षो वर्णितः। अप्राप्तत्रेताग्नि संस्कारस्य पत्युः पूर्वोक्तस्य नष्टाग्निहोत्रस्य स्त्रीत्वप्राप्तिरूपापकर्षःश्रूयते। तेन अपत्नीको भार्यांतरेण सहितो भूत्वा एकाकीवा आधानादि कृत्वा नष्टाग्निहोत्रत्वं नाशयेत्॥ आहिताग्नेः पूर्वमृतभार्यायै वैतानाग्नि दानं एकाकिनः आधानं चेति द्वयमपि नित्यं॥ यदाह मंठनः—

आहिताग्नेर्मृतस्त्रीकस्याधानं संन्यासिनोमतः। संन्यासं वारयंत्यन्ये यावज्जीवाग्निहोत्रिणः॥ इति तस्मान्नष्टदारो भार्यायै अग्नीन् समर्प्य विधुरोपि अग्नीनाधाय विरक्तश्चेत् तानुत्सृज्यसंन्यसेत्। अविरक्तश्चेत् तेष्वेव जुहुयात्। नतु रंडा नष्टाग्निहोत्रो भवेदिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(अपत्नीकाधान निर्णये) अनंत देवीये :—

शवाग्नयो वा एते ये मृतायां पत्न्यां म्रियंते। इति शवाग्नि धारणस्य प्रागुक्तरीत्या अगत्याप्राप्तस्य निंदितत्वात् तेषां उत्सर्गः प्राप्नोति। ततश्च तानुत्सृष्टानेवा मत्वा अपत्नीकोपि सन् जीवन् आदधीतैव त्रिविधानप्यग्नीन्। अपत्नीकाधान निर्णये :— य आहिताग्निः आधानानन्तरं महाव्याधिना ग्रस्तः तदा आधाने अनाधिकृतः। सिद्धाग्नित्यागश्च तस्य नेष्यते "वीरहावा एव देवता योग्निमुद्वासयेते" तादृशस्यापि यदि भार्या म्रियते तदा पत्नीसंस्कारस्य अवश्यकत्वात् स्वस्यच आधाने अनाधिकारात् अगत्याग्नेर्विभागः प्राप्नोति॥श्लोकः॥ पुनः परिणयाधानेन युज्येत मृताचसा। गार्हपत्यैकदेशेन दाह्या मन्वादि शासनात्॥ इति वचनात्॥ आधानासंभव एव अग्नेर्विभागस्य प्राप्तित्वात्। सर्वाण्यग्निस्थापन वचनानि एतदभिप्रायेणैव प्रवर्तन्ते।

आपस्तंब पितृमेध सूत्रस्य गोपाल भाष्ये :— अष्टमः खंडः (पत्र ४६)

अथ य आहिताग्निः अशक्य विवाहतया स्वाग्निभिः पत्नीं दाहितवान् प्राग्विवाहादग्न्याधेयाद्वा म्रियेत, यश्च शक्याशक्य विवाहसंशये पत्नीदाहोपयुक्ताग्निः सन् विवाहं कर्तुं न शक्नुयात् तयोः कथं अग्निसंपत्तिः। किमत्र प्रेष्यं। उच्यते। उभयो र्विधुराग्नितया विच्छिन्नाग्नितुल्यत्वम्। अत्रपूर्वस्य — प्रेताग्नि दानानंतरं शक्यविवाहस्य प्रेताधानादग्निसंपत्तिः। इतरस्यातु प्रेताग्नि दानानंतरं शक्यविवाहस्य अग्न्याधेयादि गम्यत एव। अत्रश्लोकः पत्नीदाहोपयुक्ताग्ने रग्न्याधेयात्पुरामृतौ। प्रेताधानंतु कर्तव्यं अग्न्याधानंजीवतः॥ निर्णयसिंधुतृतीयपरिछेदे ८

वस्तुतस्तु अग्निसाध्य कामनासत्वे पत्न्या अपि प्राधान्यं। तदसत्वेत्वंगत्वं॥ आधे पूर्वं मृतां पत्नीं अग्निभिर्दग्ध्वाऽपूर्वाधानं कुर्यादि पत्नीसहितस्तद्दाहेतो वा कुर्यात्। तयोर्यदि पूर्वं म्रियते तत्र प्रेतायां पितृमेधः संपद्यते इत्युपक्रम्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदि अयं दारकमणि अदीक्षितः आत्मार्थमग्न्याधेयं कुर्यात् ॥इति

भारद्वाज स्मृतेः ॥अग्न्याधेयं अपूर्वाधानं पुनराधानश्रद्धाभावात् ॥

निर्णय सिंधौ:- नहि पत्नी प्रधानैवागं मेव वेति निरुक्तेः

एवंच यावज्जीवं समापयेत्, इत्यस्य द्विधुराधाने नित्यतया

अधिकार परता/ नतु पूर्वाग्निष्वाग्नेत्रे परता/ तस्या अप्राधान्यस्य

/एवंच व्यवस्थया अग्नेर्निमित्तयो सिद्धो एकदेशाग्नि-

दाहः प्रधानकर्मनिष्ठापरः/ "पत्नी कोव्याग्नेत्रोत्रमाहरेत्" इति ऐतरेय-

ब्राह्मण भाष्ये पूर्व मृतायाः निमित्तेन दाहः, उत्सर्गेष्टिः पुनराधानंचेति

मुक्तं तदंगत्व पक्षे बोध्यम्/ प्रधानपक्षे तु पूर्व मृतायाः

त्रेताग्नेर्दाहः पुनरन्याधानं इति सिद्धम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.12.19 15:52
,TRANSFERRED=2019/12/13 at 15:54:41
,PAGES=4
,TYPE=STD
,NAME=S0002341
,Book Name=M-2251-ROTEREY BRAHAMAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection